www.sgbauonline.com

**AU–2063**

**B.A. (Part—I) Semester—II Examination**

**SANSKRIT LITERATURE**

**(Literature of Classical Language)**

Time : Three Hours] [Maximum Marks : 80

**N.B. :—** Write answers in medium offered.

**सूचना :—** उत्तरे स्वीकृत माध्यमातून लिहावीत.

**सूचना :—** उत्तर स्वीकृत माध्यम में लिखिये।

1. Translate any ***five*** of the following :

कोणत्याही **पाच** श्लोकांचा अनुवाद करा :

किसी भी **पांच** श्लोकों का अनुवाद कीजिये :

(1) शिर: शार्वं स्वर्गात् पशुपतिशिरस्त: क्षितिध्रं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलाहीम्।
अधोऽधो गङ्गेय पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपात: शतमुख:।।

(2) येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्म:।
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति।।

(3) जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपा करोति।
चेत: प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गति: कथय किं न करोति पुंसाम्।



www.sgbauonline.com

www.sgbauonline.com

(4) सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ।।

(5) यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वेगुणाः काञ्चनमाश्रयन्ति ।।

(6) राजन ! दुधुक्षसि यदि क्षितिधेनुमेनां
तेनाद्य वत्समिव लोकममुं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपुष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ।।

(7) आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ।।

(8) यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोतिमरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृहणाति तुल्यं जलम् ।। 20

2. Write answer in brief on any ***one*** of the following :
कोणत्याही **एका** प्रश्नाचे सविस्तर उत्तर लिहा :
किसी भी **एक** प्रश्न का उत्तर सविस्तार लिखिये :

Write literary value of भर्तृहरि
भर्तृहरि चे साहित्यिक मूल्यांकन करा.
भर्तृहरि का साहित्यिक मूल्यांकन कीजिये ।

**OR/किंवा/अथवा**

Write about the life of भर्तृहरि.
भर्तृहरि चे जीवन चरित्र लिहा.
भर्तृहरि का जीवन चरित्र लिखिये । 13



www.sgbauonline.com

www.sgbauonline.com

3. Write notes – any ***three*** :

टिपा लिहा — कोणत्याही **तीन** :

टिप्पणी लिखिये — कोई भी **तीन** :

(1) विद्वद्पद्धति:

(2) मानपद्धति:

(3) विद्या माहात्म्यम्

(4) दुर्जनपद्धति:

(5) नीति: । 15

4. Translate any ***four*** of the following :

कोणत्याही **चार** श्लोकांचा अनुवाद करा :

किसी भी **चार** श्लोकों का अनुवाद कीजिये :

(1) आत्मारामसुधी: पवित्रचरितोऽसौ वेङ्कटेशात्मजो
योमे पूज्यपितामहस्य जनको विद्वद्वरै: पूजित: ।
सच्छिष्यै: श्रुतिमन्त्रघोषणपरै: संवेष्टितोऽशोभत
स्कन्धावस्थितमञ्जुशब्दविहगैरश्चत्थवृक्षो यथा ।।

(2) योऽजोऽपरो वेदमुखो द्विजोऽपि
यो रुक्मिणीप्राप्तिवशाद्धरित्वम् ।
संपादयामास हि य: शिवत्वं
गङ्गोदकक्लिन्नशिरोरुहैश्च ।।

(3) गातुं तत् तिलकस्य वीरचरितं कर्णामृतं पावनम्
इच्छावीचिततिप्रकम्पितजलो मन्मानसाम्भोनिधि: ।
प्रज्ञाल्पा विषयो महानिति भवेत् पङ्गोर्गिरिर्लङ्घनं
प्रांशुप्राप्यफलाभिलाष इव वा ह्रस्वस्य तद् दुष्करम् ।।



www.sgbauonline.com

www.sgbauonline.com

(4) भासं नाट्यविलासहासरुचिरं हर्षं च हर्षप्रदं

माघं वाग्धनदं च चित्ररचनागुर्वर्थदं भारविम्।

वाग्वश्यं भवभूतिमुत्तरकथां रामस्य योऽवर्णयद्

वन्दे तान् सकलान् प्रबन्धरचनाशक्तिप्रदानाय मे।।

(5) वन्दे मित्रं माधवं मे सतीर्थ्यं

विद्वद्वर्यं डाऊवंशावतंसम्।

श्रुत्वा काव्यं यस्य हास्यप्रधानं

हृष्टाः कामं बुद्धिमन्तो रसज्ञाः।।

(6) प्रसन्ना वाग्देवी सततसुखदा भक्तवशगा

निशान्ते स्वप्ने मां कलितमहिमानं गणपते।

अवोचत् सानन्दं स्थिरचरगुरुः शम्भुतनयः

कलौ बुद्धेर्ज्ञाता हरतु तव विघ्नाननुदिनम्।। 16

5. Answer any ***sixteen*** of the following :

खालीलपैकी कोणत्याही **सोळा** प्रश्नांची उत्तरे लिहा :

निम्नलिखित में से किन्हीं **सोलह** प्रश्नों के उत्तर लिखिये :

(1) माहेश्वरसूत्राणां संख्या कति अस्ति ?

(अ) एकादश (ब) द्वादश

(क) त्रयोदश (ड) चतुर्दश

(2) माहेश्वरसूत्राणां रचनाकारः कः ?

(अ) महेश्वरः (ब) पाणिनी

(क) कात्यायनः (ड) वरदराजः



www.sgbauonline.com

www.sgbauonline.com

(3) अष्टाध्यायीग्रन्थे कति अध्यायाः सन्ति ?

(अ) दश (ब) अष्ट

(क) नव (ड) एकादश

(4) माहेश्वरसूत्रेषु यः अन्तिमवर्णः तस्य संज्ञा किम् स्यात् ?

(अ) हल् (ब) अन्त्यम्

(क) स्वरः (ड) व्यञ्जनः

(5) कस्य लोपः भवति ?

(अ) हलन्त्यस्य (ब) उपदेशस्य

(क) मध्यमवर्णस्य (ड) स्वरस्य

(6) प्रत्येकं अध्याये कति पादाः सन्ति ?

(अ) अष्ट (ब) चत्वारः

(क) त्रयः (ड) पञ्च

(7) मुखसहितनासिकयोः उच्चार्यमाणः वर्णः किं संज्ञः भवति ?

(अ) अननुनासिकः (ब) अनुनासिकः

(क) सानुनासिकः (ड) नासिकयः

(8) 'ऋ' वर्णस्य उच्चारण स्थानं किं ?

(अ) कंठ (ब) मूर्धा

(क) तालु (ड) दन्ताः

(9) 'अच्' प्रत्यहारे केषाम् अन्तर्भावः भवति ?

(अ) व्यंजनानाम् (ब) स्वर तथा च व्यंजनानाम्

(क) स्वराणाम् (ड) अइड स्वराणाम्



www.sgbauonline.com

www.sgbauonline.com

(10) बाह्य प्रयत्नस्य कति भेदा: सन्ति ?

(अ) पञ्च (ब) अष्ट

(क) सप्त (ड) एकादश

(11) सुबन्तं तिङन्तं किं संज्ञं स्यात् ?

(अ) संयोग: (ब) पदम्

(क) संहिता (ड) लोप:

(12) 'यण्' प्रत्यहारे केषां वर्णानां समावेश: भवति ?

(अ) स्पर्श: (ब) उष्म:

(क) अन्तस्थ: (ड) स्वर:

(13) 'ऊ' इति स्वर: कीदृश: ?

(अ) प्लुत: (ब) ह्रस्व:

(क) दीर्घ: (ड) उष्म:

(14) व्यंजनानाम् अन्तर्भाव: कस्मिन् प्रत्याहारे भवति ?

(अ) हल् (ब) अच्

(क) झश् (ड) झल्

(15) हकारादिषु अकार: किमर्थ: ?

(अ) सूत्रार्थ: (ब) लोपार्थ:

(क) अदर्शनार्थ: (ड) उच्चारणार्थ:

(16) सिद्धांत कौमुदी ग्रन्थ: केन नाम्ना प्रसिद्ध: ?

(अ) त्रिमुनी व्याकरण (ब) बृहत् व्याकरण

(क) कौमुदी (ड) व्याकरण सिद्धांत:



www.sgbauonline.com

www.sgbauonline.com

(17) वार्तिकानाम् रचनाकारः कः ?

(अ) पातञ्जली (ब) कात्यायनः

(क) भट्टोजी दीक्षितः (ड) पाणिनी

(18) पाणिनीना कस्य ध्वनिः श्रुतः ?

(अ) महेश्वरस्य (ब) दुन्दुभी वाद्यस्य

(क) डमरु वाद्यस्य (ड) वीणा वाद्यस्य

(19) 'अदर्शनं लेपः।' इति सूत्रस्य प्रकारः कः अस्ति ?

(अ) परिभाषा सूत्र (ब) संज्ञासूत्र

(क) नियमसूत्र (ड) विधि सूत्र

(20) 'लृ' वर्णस्य द्वादश भेदाः कस्मात् ?

(अ) दीर्घाभावात् (ब) ऱ्हस्वाभावात्

(क) प्लुताभावात् (ड) उदात्ताभावात् 16



www.sgbauonline.com

www.sgbauonline.com

www.sgbauonline.com